दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णद्वादशी
श्रावण 25 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-291 | 1 | अगस्त 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 प्रधानमन्त्रिणः १५०० कोटि-रुप्यकाणां घोषणायाः धनं नाद्यापि प्राप्तम्, RDG- स्थगनेन हिमाचलस्य बृहत् क्षतिः- मुख्यमन्त्री सुक्खू

3 इदानीं प्रदेशात् बहिः न गन्तव्यम्, IGMC- मध्ये प्राप्स्यते 256-स्लाइस CT तथा बोन मैरो ट्रान्सप्लाण्ट-सुविधा

5 स्वर्गीयरामप्रतापदुबे-स्मृतौ अन्तर्विद्यालयीय-संस्कृत-समूहगान-समूहनृत्य-प्रतियोगितयोः आयोजनम्


# प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रमण्डलक्रीडायाः पदकविजेतृभिः सह नवीनदिल्लीनगरे स्वनिवासस्थाने मिलितवान्



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् वर्षे राष्ट्रमण्डलक्रीडायाः पदकविजेतृभिः सह नवीनदिल्लीनगरे स्वनिवासस्थाने मिलितवान्। एकस्मिन् वीडियो सन्देशे प्रधानमन्त्रिणा उक्तं यत् ये जनाः क्रीडायां प्रवृत्ताः सन्ति तेषां जीवने प्रगतिः भवति। सः देशवासिनां कृते आह्वानं कृतवान् यत् ते भारतीयक्रीडकान् सर्वदा प्रोत्साहयन्तु। स्कॉटलैण्डदेशस्य ग्लास्गोनगरे जुलाईमासस्य २३ दिनाङ्कात् २ अगस्तपर्यन्तं आयोजिते राष्ट्रमण्डलक्रीडायां भारतं चतुर्थस्थानं प्राप्तवान् । भारतीयक्रीडकाः विभिन्नेषु क्रीडास्पर्धासु १३ स्वर्णपदकानि, १७ रजतपदकानि, ९ कांस्यपदकानि च सहितं आहत्य ३९ पदकानि प्राप्तवन्तः ।

## अद्यतनीयं सुभाषितम्

**न हि सत्यात्परो धर्मो, न हि सत्यात्परं तपः।**
**न हि सत्यात्परो मार्गो, तस्मात्सत्यं समाचरेत्॥**

(नारद पुराण- ०१/३३/६०)

अर्थात्- सत्य से बढ़कर कोई धर्म नहीं है, सत्य से बढ़कर कोई तप नहीं है और सत्य से श्रेष्ठ कोई मार्ग नहीं है। इसलिए मनुष्य को सदा सत्य का ही आचरण करना चाहिए।




## शिक्षामन्त्री प्रह्लाद जोशी इत्यनेन पारदर्शी परीक्षाव्यवस्थायां बलं दत्त्वा एनटीएसम्बद्धानां विषयाणां समीक्षा कृता



हिमसंस्कृतवार्ता। केन्द्रीयशिक्षामन्त्री प्रह्लाद जोशी शिक्षामन्त्रालयस्य सचिवेन वरिष्ठाधिकारिभिः सह राष्ट्रियपरीक्षणसंस्थायाः (एनटीए) सम्बद्धविषयेषु संगोष्ठीं कृतवान्। सामाजिकमाध्यमेषु जोशीमहोदयेन उक्तं यत् ते संस्थागतरूपरेखायाः सुदृढीकरणेन, प्रक्रियाणां सुव्यवस्थितीकरणेन, छात्राणां प्रति उत्तरदायित्वं सुनिश्चित्य च सम्बद्धानां महत्त्वपूर्णविषयाणां चर्चां कृतवन्तः। जोशीमहोदयेन उक्तं यत् प्रत्येकस्य छात्रस्य आकांक्षां पूरयति इति सुदृढं, पारदर्शकं, विश्वसनीयं च परीक्षाव्यवस्थां निर्मातुं सर्वकारस्य प्राथमिकं ध्यानं वर्तते।

## उपराष्ट्रपतिः सी.पी. राधाकृष्णन अण्डमान-निकोबारद्वीपयोः भ्रमणे नेताजीसुभाषचन्द्रबोसद्वीपं गतवान्



हिमसंस्कृतवार्ता। उपराष्ट्रपतिः सी.पी. राधाकृष्णन अण्डमान-निकोबारद्वीपयोः भ्रमणं कृतवान् । सः नेताजीसुभाषचन्द्रबोसद्वीपे अनेकानि ऐतिहासिकस्थलानि गतवान् । श्री राधाकृष्णन् १९४३ तमे वर्षे दिसम्बरमासे अण्डमानस्य ऐतिहासिकयात्रायाः समये यत्र नेताजी सुभाषचन्द्रबोसः निवसति स्म तस्य भवनस्य अपि दर्शनं कृतवान् । उपराष्ट्रपतिः चर्चस्य, सैन्यस्थानकस्य, गन पवाइण्ट्-क्षेत्रस्य, स्मृति-सङ्ग्रहालयस्य च दर्शनं कृतवान् । एतदतिरिक्तं उपराष्ट्रपतिः द्वीपानां समृद्ध-इतिहासस्य, भविष्यस्य विकास-योजनानां च विषये अवगतम् ।

## देशव्यापि-उत्साहेन 'हर घर तिरङ्गा' अभियानस्य प्रारम्भः




**नवदिल्ली:** देशभक्तेः भावनां वर्धयितुं, राष्ट्रिय-एकतां सुदृढीकर्तुं, सांस्कृतिक-विरासतं च पोषयितुं सम्पूर्णे देशे 'हर घर तिरङ्गा' अभियानं समारब्धम्। २०२२ तमवर्षात् आरब्धस्य अस्य जनान्दोलनरूपस्य अभियानस्य एतत् पञ्चमं वर्षम् अस्ति। अस्मिन् वर्षे अस्य अभियानस्य विशेषं महत्त्वम् अस्ति यतोहि एतत् राष्ट्रियगीतस्य **"वन्दे मातरम्"** इत्यस्य १५० तमेन वार्षिकोत्सवेन सह सम्बद्धम् अस्ति। अभियानस्य अङ्गरूपेण देशे 'वन्दे मातरम्' इत्यस्य सामूहिकगानं आयोजयिष्यते। नवदिल्ल्यां भारतीयजनतापार्टी-सांसद् बांसुरी स्वराजः पण्डितमदनमोहनमालवीयस्य स्मारके पुष्पाञ्जलिं अर्पितवती, ततः परं 'तिरङ्गायात्रा' समायोजिता।

## 'सिन्दूर-अभियानेन' आतङ्कवादं प्रति भारतस्य शून्य-सहनशीलतायाः वैश्विकः सन्देशः : राजनाथसिंहः

**नवदिल्ली:** रक्षामन्त्री राजनाथसिंहः अवदत् यत् **'सिन्दूर-अभियानेन'** (*Operation Sindoor*) विश्वे एषः सन्देशः प्रेषितः यत् भारतं स्वनागरिकाणां सुरक्षायाः कृते तथा च देशस्य नारीणां सिन्दूरस्य रक्षणाय कस्यापि सीमां यावत् गन्तुं शक्नोति। सः नवदिल्ल्यां 'सिन्दूर-महारक्तदान-यात्रा' रक्तदान-शिविरस्य उद्घाटनप्रसङ्गे एतत् अवदत्। रक्षामन्त्री आतङ्कवादीनां तस्य पोषकाणां च विनाशार्थं भारतीयसेनायाः पराक्रमस्य प्रशंसां कृतवान्। सः अवदत् यत् यत्र अभियानं शौर्यस्य प्रतीकम् अस्ति, तत्रैवेदं रक्तदानशिविरं करुणायाः प्रतीकम् अस्ति। सः युवानः रक्तदानं संस्कृतिरूपेण अङ्गीकर्तुम् प्रेरितवान्।



# प्रधानमन्त्रिणः १५०० कोटि-रुप्यकाणां घोषणायाः धनं नाद्यापि प्राप्तम्, RDG- स्थगनेन हिमाचलस्य बृहत् क्षतिः- मुख्यमन्त्री सुक्खू




**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचलप्रदेशे राजस्वघाटा-अनुदानस्य (RDG) स्थगनेन, केन्द्रात् च प्राप्यमाणायाः आर्थिकसहायतायाः विषये मुख्यमन्त्री सुखविन्द्रसिंहसुक्खू विपक्षं राजनीतिम् अतिक्रम्य प्रदेशस्य हिताय सर्वकारस्य समर्थनं कर्तुम् निवेदितवान्। मुख्यमन्त्री अवदत् यत् एषः कस्यापि राजनैतिकदलस्य विषयः नास्ति, अपितु हिमाचलस्य जनानां अधिकारैः सम्बद्धः विषयः अस्ति। सुक्खू-महोदयः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी सितम्बर २०२५ तमे वर्षे आपद्ग्रस्ताय हिमाचलाय १५०० कोटि-रुप्यकाणां वित्तीयसहायतायाः घोषणां कृतवान् आसीत्, किन्तु एषा राशिः नाद्यापि प्रदेशाय प्राप्ता। सः अकथयत् यत् केन्द्रात् प्राप्यमाणया एतया सहायतया सह RDG-विषयः अपि हिमाचलस्य वित्तीयस्थित्या सह साक्षात् सम्बद्धः अस्ति।

## RDG-स्थगनेन वर्धितः वित्तीयदबावः

मुख्यमन्त्रिणः अनुसारम्, राजस्वघाटा-अनुदानस्य अर्थात् RDG-स्थगनेन हिमाचलस्य प्रतिवर्षं प्रायः ८ तः १० सहस्रकोटि-रुप्यकाणां क्षतिः भवति। षोडशस्य वित्तायोगस्य अनुमोदनानन्तरं २०२६- २७ वर्षात् राज्यानां कृते RDG-व्यवस्था समाप्ता अभवत्। हिमाचलः दीर्घकालात् अस्य अनुदानस्य उपरि निर्भरः आसीत्, अस्य स्थगनेन च राज्यसर्वकारस्य वित्तीयसंसाधनेषु दबावः वर्धते इति सर्वकारः वदति। सुक्खू अकथयत् यत् हिमाचलसदृशस्य पर्वतीयराज्यस्य भौगोलिक-परिस्थितयः भिन्नाः सन्ति। अत्र मार्ग- स्वास्थ्य-शिक्षा- अन्यमौलिकसुविधासु व्ययः अधिकः भवति। तादृशस्थितौ केन्द्रात् प्राप्यमाणा वित्तीयसहायता प्रदेशस्य अर्थव्यवस्थायाः कृते अतीव महत्त्वपूर्णा अस्ति।

## १५०० कोटि सहायता RDG-अनुदानात् भिन्ना-

प्रधानमन्त्री नरेन्द्रमोदी ९ सितम्बर २०२५ तमे दिनाङ्के हिमाचलप्रदेशे अतिवृष्ट्या, जलप्लावेन, भूस्खलनेन च जातायाः हानेः समीक्षां कृत्वा १५०० कोटि-रुप्यकाणां वित्तीयसहायतायाः घोषणां कृतवान् आसीत्। एषा सहायता आपद्ग्रस्तहिमाचलाय घोषिता विशेषवित्तीयसहायता आसीत्, यद्यपि RDG राज्यानां राजस्वहानिना सम्बद्धं भिन्नं अनुदानम् अस्ति। मुख्यमन्त्रिणः सुक्खू-महोदयस्य कथनम् अस्ति यत् प्रधानमन्त्रिणा घोषिता १५०० कोटि-रुप्यकाणां सहायता नाद्यापि प्रदेशाय प्राप्ता। राज्यसर्वकारः एतं विषयं निरन्तरं केन्द्रस्य समक्षं उत्थापयन् अस्ति।

## विपक्षाय उक्तवान्- हिमाचलस्य अधिकारार्थं एकत्र आगच्छन्तु

मुख्यमन्त्री विपक्षाय निवेदनं कुर्वन् अवदत् यत् हिमाचलेन सम्बद्धेषु वित्तीयविषयेषु राजनैतिक-भेदभावान् विहाय प्रदेशस्य हिताय प्राथमिकता दातव्या। सः अकथयत् यत् केन्द्रात् हिमाचलस्य अधिकारस्य याचना कस्यचित् एकस्य राजनैतिक-दलस्य विषयः नास्ति। सुक्खू अवदत् यत् प्रदेशस्य हिताय सर्वैः राजनैतिकदलैः जनप्रतिनिधिभिः च एकत्र भूत्वा केन्द्रस्य समक्षं हिमाचलस्य पक्षः दृढतया उपस्थापनीयः। हिमाचलस्य जनानां अधिकारार्थं प्रदेशस्य आर्थिकसुदृढतायै च विपक्षस्य सहयोगः आवश्यकः अस्ति।

# 'आत्मनिर्भरभारत' - सङ्कल्पसिद्धौ भारतीयव्ययलेखा-सेवायाः महती भूमिका : रक्षासचिवः राजेशकुमारसिंहः



**नवदिल्लीः** रक्षाविभागस्य सचिवः राजेशकुमारसिंहः उक्तवान् यत् भारतीयव्ययलेखासेवा (ICoAS) विशेषतः रक्षाक्षेत्रे व्यय-न्यूनीकरणेन, साधन-सदुपयोगेन, सुदृढ-वित्तीय-अवेक्षणेन च आत्मनिर्भरभारतस्य लक्ष्यं साधयितुं निरन्तरं उत्प्रेरकभूमिकां वोढवती। सः नवदिल्ल्यां अस्याः सेवायाः स्थापनादिवसोत्सवे एतत् अवदत्।
सचिवः सर्वकारीयमन्त्रालयेषु विभागेषु च व्ययप्रबन्धनपद्धतीनां सुदृढीकरणे अधिकारीणां कार्यकुशलताम्, विश्लेषणक्षमताम्, निष्ठां च प्रशंसितवान्। रक्षाउत्पादनविभागस्य सचिवः सञ्जीवकुमारः अपि अस्याः सेवायाः विशिष्टां भूमिकां शंसितवान् तथा च राष्ट्रिय-आत्मनिर्भरतायै रणनीतिकक्षेत्रैः सह गभीर-सामञ्जस्यस्य आह्वानं कृतवान्।

## प्रधानमन्त्रि-आवासयोजना-नगरीयान्तर्गतं १.२५ कोटितः अधिकानि गृहाणि स्वीकृतानि : सर्वकारः

**नवदिल्लीः** आवास-नगरीयकार्य-मन्त्रालयेन प्रोक्तं यत् प्रधानमन्त्रि-आवासयोजना-नगरीयान्तर्गतं (PMAY-U एवं PMAY-U 2.0) सम्प्रति १.२५ कोटितः अधिकानि गृहाणि स्वीकृतानि। एतेषु एककोटितः अधिकानि गृहाणि पूर्णानि कृत्वा लाभान्वितेभ्यः समर्पितानि, येषु प्रायः एककोटिः गृहाणि महिलाभ्यः आबंटितानि सन्ति। मन्त्रालयस्य अनुसारं योजनायाः द्वितीयचरणे (PMAY-U 2.0) आर्थिकरूपेण दुर्बलवर्गाय २.०९ लक्षाधिकानि गृहाणि स्वीकृतानि सन्ति, येषु बहुसंख्यानि महिलाभ्यः, ज्येष्ठनागरिकेभ्यः, अनुसूचितजाति-जनजाति-पिछडावर्गेभ्यः च निर्दिष्टानि सन्ति।




## क्रीडावार्ता

# एशियायी-कनिष्ठ-भारोत्तोलन-प्रतियोगिता : महाराजन्-अरुमुगपाण्डियनेन रजतपदकं जितम्



**ताशकन्द (उज्बेकिस्तान):** उज्बेकिस्तानस्य ताशकन्द-नगरे आयोजितायां एशियायी-कनिष्ठ-भारोत्तोलन-प्रतियोगितायां भारतस्य भारोत्तोलकेन महाराजन्-अरुमुगपाण्डियनेन ६५ किलोग्रामभारवर्गे रजतपदकम् प्राप्तम्। सः आहत्य २८५ किलोग्रामभारं (स्नैच्-मध्ये १२८ किग्रा तथा क्लीन्-एण्ड्-जर्क-मध्ये १५७ किग्रा) उत्तोल्य स्वस्य व्यक्तिगतं श्रेष्ठं कीर्तिमानं रचितवान्। वियतनामस्य होआङ्ग-थैच्-वर्यः २९१ किग्रा भारम् उत्तोल्य स्वर्णपदकं प्राप्तवान्।

# कोरिया-मास्टर्स-२०२६ : अस्मिता चालिहा वर्येण प्रथमं BWF विश्व-टूर्-किरीटं प्राप्तम्




**सोल (दक्षिणकोरिया):** भारतस्य बैडमिण्टन-क्रीडिका अस्मिता चालिहा कोरिया-मास्टर्स-२०२६ प्रतियोगितायाः महिला-एकल-अन्तिमस्पर्धायां चीनदेशस्य हान-कियान-शी-वर्मां पराजित्य स्वस्य प्रथमं BWF विश्व-टूर्-किरीटं जितवती। असमराज्यस्य एषा क्रीडिका प्रथमचक्रस्य पराजयात् न्यवर्तत तथा च १४-२१, २१-१४, २१-१४ इति अङ्कैः ५३ निमेषेषु विजयं प्राप्तवती।

# विश्व-एथलेटिक्स-अण्डर-२०

## प्रतियोगितायां भारतस्य पदकसंख्या त्रिः जाता



**अमेरिकाः** अमेरिकादेशे आयोज्यमानायां विश्व-एथलेटिक्स-अण्डर-२० प्रतियोगितायां भारतस्य पदकसंख्या त्रिः संजाता। भारतस्य वसन्तकुमार-मेघवालेन उच्चकूर्दने (*High Jump*) रजतपदकं, शाहनवाज-खानवर्येण च दीर्घकूर्दने (*Long Jump*) कांस्यपदकं जितम्।
१९ वर्षीयः वसन्तः २.२१ मीटरमितम् उच्चकूर्दनं कृत्वा अस्मिन् वर्गे पदकं जेता प्रथमः भारतीयः अभवत्। दीर्घकूर्दने १८ वर्षीयः शाहनवाज़ः ७.८४ मीटरमितं कूर्दनं कृत्वा कांस्यं प्राप्तवान्। अस्मात् पूर्वं क्षेपणि-क्रीडायां (*Javelin Throw*) आशीषयादवेन अपि रजतपदकं प्राप्तम् आसीत्।

# इदानीं प्रदेशात् बहिः न गन्तव्यम्, IGMC- मध्ये प्राप्स्यते 256-स्लाइस CT तथा बोन मैरो ट्रान्सप्लाण्ट-सुविधा




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे स्वास्थ्यसेवानाम् आधुनिकीकरणस्य दिशि सर्वकारेण महत् पदक्षेपं स्वीकृतम्। मुख्यमन्त्री ठाकुर-सुखविन्द्रसिंहसुक्खू उन्नत- स्वास्थ्य- उपकरणानां तथा चिकित्सालयानाम् आधारभूत- संरचनायाः सुदृढीकरणाय ८३.८५ कोटि-रुप्यकाणि निर्गमितवान्। अस्यानुसारं IGMC-शिमलामध्ये 256-स्लाइस सीटी-स्कैन, SPECT- यन्त्रम्, 'बोन मैरो ट्रान्सप्लाण्ट' (अस्थिमज्जा- प्रत्यारोपण) इत्यस्य च कृते 'सेल सेपरेटर' यन्त्रस्य सुविधा उपलब्धा कारयिष्यते। IGMC-शिमलामध्ये SPECT यन्त्रस्य, बोन मैरो ट्रान्सप्लाण्ट-कृते सेल-सेपरेटरयन्त्रस्य क्रयणाय ८ कोटि-रुप्यकाणि निर्गमितानि सन्ति। SPECT यन्त्रेण शरीरस्य विविधाङ्गानाम् ऊतकानां च कार्यप्रणाल्याः त्रि-आयामी (3D) चित्राणि निर्मातुं शक्यन्ते। अनेन हृदय- मस्तिष्क- अस्थि- फुफ्फुस- वृक्क- सम्बद्धरोगाणां परीक्षणे साहाय्यं भविष्यति। केषाञ्चन प्रकाराणां कर्करोगाणां (कैन्सर), अन्य-गम्भीर-रोगाणां च मूल्याङ्कने अपि एषा तन्त्रज्ञानानुसृता सुविधा उपयोगिनी भविष्यति।

## बोन मैरो ट्रान्सप्लाण्ट-मध्ये साहाय्यं करिष्यति सेल सेपरेटर

सेल-सेपरेटर-यन्त्रस्य साहाय्येन रोगिणः अथवा दातुः (डोनर) स्टेम्-कोशिकाः एकत्र कर्तुं शक्यन्ते। एताः आवश्यक-प्रक्रियया प्रत्यारोपणाय सज्जीकर्तुं शक्यन्ते। आवश्यकतानुगुणेन एताः सुरक्षिताः स्थापयित्वा रोगिणि प्रत्यारोपिताः भविष्यन्ति। अनेन IGMC-मध्ये बोन मैरो ट्रान्सप्लाण्ट-सुविधानाम् अधिक-सुदृढीकरणस्य आशा अस्ति।

## IGMC-मध्ये स्थापयिष्यते 256-स्लाइस सीटी-स्कैन

IGMC शिमलामध्ये 256 स्लाइस सीटी-स्कैन-यन्त्रस्य क्रयणाय १२ कोटि- रुप्यकाणि निर्गमितानि। एतदतिरिच्य षट्- उच्चस्तरीय- अल्ट्रासाउण्ड-यन्त्राणां क्रयणाय तथा CTL- कण्डाघाट-इत्यस्य उन्नयनाय १४ कोटि-रुप्यकाणि स्वीकृतानि। द्वयोः एक्स-रे यन्त्रयोः क्रयणाय, ययोः एनालॉग् तथा डिजिटल्-प्रणाली समाविष्टा अस्ति, ३.५० कोटि- रुप्यकाणि स्वीकृतानि। एतैः आधुनिक-उपकरणैः चिकित्सालयस्य परीक्षण-सुविधानां सुदृढीकरणे, रोगिणां च जांचप्रक्रियायाः अधिक-प्रभावकारिकरणे साहाय्यं प्राप्स्यते।

## टाण्डा-मध्ये अपि षट् आधुनिक-अल्ट्रासाउण्ड- यन्त्राणि

काङ्गड़ास्थित- डॉ. आरपीजीएमसी- टाण्डा-चिकित्सालयाय षट् उच्चस्तरीय- अल्ट्रासाउण्ड-यन्त्राणां क्रयणम् स्वीकृतम्। अस्य कृते सर्वकारेण ६ कोटि-रुप्यकाणि निर्गमितानि। अनेन मेडिकल-महाविद्यालये रोगिणां परीक्षणक्षमता वर्धिष्यते आधुनिकाः निदानसुविधाश्च उपलब्धाः भविष्यन्ति।

## नेरचौक-मध्ये निर्मास्यते PET-स्कैन-भवनम्

मण्डी-मण्डलस्य लालबहादुरशास्त्री- राजकीय-मेडिकल- महाविद्यालय- नेरचौके PET- स्कैन-भवनस्य निर्माणाय २ कोटिरुप्यकाणि स्वीकृतानि। अनेन प्रदेशे गम्भीररोगाणां, विशेषतः कर्करोगस्य परीक्षणेन उपचारैः च सम्बद्धाः सुविधाः सुदृढाः भविष्यन्ति इति आशा अस्ति।

## ज्वालामुखी तथा जोगिन्दरनगर-चिकित्सालयाभ्याम् अपि धनराशिः

काङ्गड़ा-मण्डलस्य सिविल- चिकित्सालय-ज्वालामुखी- कृते १७.९५ कोटि-रुप्यकाणि निर्गमितानि। अस्मिन् चिकित्सालये जल-विद्युत्-व्यवस्थायाः प्रावधानम् अपि सम्मिलितम् अस्ति। अपरपक्षे सिविल- चिकित्सालय- जोगिन्दरनगरे चिकित्सकानां परिचारिकाणां च आवास- निर्माणाय ४.९० कोटि-रुप्यकाणि आवण्टितानि।
हमीरपुरस्य चिकित्सा- महाविद्यालय- जोलसप्पड़-मध्ये वाहनस्थगनाय (पार्किङ्ग-सुविधायै) १२ कोटि-रुप्यकाणि स्वीकृतानि सन्ति। चिकित्सा-महाविद्यालय-जोलसप्पड़- मध्ये आरक्षिस्थानस्य (पुलिसस्टेशन) निर्माणाय ३.५० कोटि- रुप्यकाणि मञ्जूरीकृतानि। एतेन सह बिलासपुर-मण्डलस्य घुमारवींक्षेत्रे SDAMO कार्यालयस्य चिकित्सालयसुविधानां च प्रावधानं कृतम् अस्ति।

## रोगिभिः प्रदेशात् बहिः न गन्तव्यम्- सुक्खू

मुख्यमन्त्री ठाकुर-सुखविन्द्रसिंहसुक्खू अवदत् यत् राज्यसर्वकारस्य प्रयासः अस्ति यत् हिमाचलस्य जनाः आधुनिकाः गुणवत्तापूर्णाः च स्वास्थ्यसेवाः प्रदेशे एव प्राप्नुयुः। रोगिणः उन्नत-उपचाराय अन्यराज्याणि प्रति न गच्छेयुः, अस्य कृते स्वास्थ्यसंरचना निरन्तरं सुदृढा क्रियते। सः अकथयत् यत् सर्वकारः विशेषतः ग्रामीण- दूरस्थक्षेत्रेषु निवद्भ्यः जनेभ्यः आधुनिकाः, अल्पव्ययसाध्याः, गुणवत्तापूर्णाः च स्वास्थ्यसेवाः प्रापयितुं कटिबद्धः अस्ति।

# प्रदेशस्य १३५ पेयजल-सेचन-योजनाः भविष्यन्ति सौर-ऊर्जया सञ्चालिताः, विद्युत्व्ययं न्यूनीकर्तुं सज्जीकरणम्





**हिमसंस्कृतवार्ताः- शिमला ।** राज्ये पेयजल-सेचन-योजनाः सौर-ऊर्जया सह योजयितुं सर्वकारेण सज्जीकरणम् आरब्धम्। अस्य अन्तर्गतं जल-शक्ति-विभागस्य १३५ पेयजल- सेचन- योजनाभ्यः विद्युत्-आपूर्तिः 'सोलर-पैनल' माध्यमेन कर्तुं योजना अस्ति। अनेन विभागे वर्धमानं विद्युतः व्ययं न्यूनीकर्तुं सहैव ग्रामीणक्षेत्रेषु जलयोजनाः अधिकाः स्थायिन्यः पर्यावरण- अनुकूलाश्च रचयितुं शक्ष्यन्ते। सूचनानुसारं प्रदेशे सम्प्रति जल-शक्ति-विभागस्य दश-सहस्रभ्यः अधिकाः जल-योजनाः सन्ति। यदा च सेचनयोजनानां विवरणं पञ्च-सहस्राणां समीपे अस्ति। विभागस्य अधिकांशयोजनानां सञ्चालनाय 'पम्पिंग' यन्त्राणि, चालकानि अन्यानि उपकरणानि च निरन्तरं विद्युतः आवश्यकतां सहन्ते। विद्युतः दराणां उपभोगस्य च वर्धनात् कारणेन विभागः प्रतिवर्षं प्रायः ८०० कोटि-रूप्यकाणां विद्युत्-पत्रं दातुं विवशः भवति। अधुना एतमेव व्ययं न्यूनीकर्तुं योजनाः सौर-ऊर्जया सह योजयितुम् कार्यं क्रियमाणम् अस्ति। ज्ञातं यत् योजनायाः अन्तर्गतं प्रथमचरणे १३५ पेयजल-सेचनयोजनाः सौर- ऊर्जया सह योजयितुं सज्जीकरणम् अस्ति। एतासु योजनासु 'सोलर-पैनल' यन्त्राणि स्थापयिष्यन्ते, येभ्यः 'पम्पिंग' कार्याय जलापूर्तये च आवश्यकी विद्युत् उत्पादयिष्यते। प्रथमचरणे चयनित-योजनानाम् परिणामानां प्रारूपस्य च सफलतायाः मूल्याङ्कनात् अनन्तरम् एतत् प्रदेशस्य अन्यासु योजनासु अपि प्रवर्तयितुं शक्यते। अस्याः व्यवस्थायाः यासु योजनासु प्रतिमासं बृहत्-मात्रायां विद्युतः उपभोगः भवति, तत्र विद्युत्-पत्रेषु प्रत्यक्षं न्यूनता आगन्तुम् आशा अस्ति। 'सोलर-पैनल' यन्त्रैः सह योजनानाम् संयोजनेन विद्युतः उपरि निर्भरता न्यूना भविष्यति विभागाय च दीर्घ-समये महती आर्थिक-रक्षणं भवितुं शक्यते। सूच्यते यत् चिह्नितासु योजनासु 'प्रोजेक्ट' आधारेण वैयक्तिक-समवायेभ्यः 'सोलर-प्लांट' यन्त्राणि विकसितुं दायित्वं समर्पयितुम् अपि योजना अस्ति। यत्किञ्चित् पेयजल-सेचन-योजनाः सौर-ऊर्जया सह योजयितुं सर्वकारस्य योजना सफला भवति चेत् आगामिवर्षेषु अधिकाधिक-योजनाः एतया सह योजयितुं दिशि अग्रे सरिष्यति। व्यक्तम् अस्ति यत् पेयजल-सेचन-योजनाः सौर- ऊर्जया सह योजयित्वा आर्थिक-भारस्य न्यूनीकरणेन सहैव योजनाभ्यः स्वच्छायाः नवीकरणीयायाः च ऊर्जायाः विकल्पः लप्स्यते। ग्रामीण-दूरस्थ-क्षेत्रेषु यत्र विद्युतः उपलब्धतायां आपूर्तौ वा बाधा भवति, तत्रापि सौर-ऊर्जा-आधारिता व्यवस्था उपयोगिनी सिद्धा भवितुं शक्यते।

# झारखण्ड-लोकसेवायोगस्य (JPSC) प्रारम्भिकपरीक्षा निरस्ता : परीक्षासु अनियमिततायाः आरोपानन्तरं सर्वकारस्य निर्णयः

राँचीः झारखण्ड-लोकसेवायोगस्य (JPSC) तथा च झारखण्ड-कर्मचारी-चयनआयोगस्य (JSSC) परीक्षासु अनियमिततायाः आरोपान् गृहीत्वा प्रदर्शनं कुर्वतां छात्राणां मुख्यमाङ्ग्यः झारखण्डसर्वकारेण अङ्गीकृताः। राज्यमन्त्री सुदिव्यकुमारसोनुः अवदत् यत् सर्वकारेण १४ तमी JPSC प्रारम्भिकपरीक्षा तथा च २०२३-२५ वर्षयोः 'बैकलॉग' (Backlog) परीक्षाः निरसितुं सहमतिः दत्ता।सर्वकार-छात्राणां मध्ये जातायाः वार्तायाः अनन्तरम् एतद् घोषणं कुर्वन् मन्त्री अवदत् यत् वित्तीय-अनियमिततानाम् अन्वेषणं प्रवर्तननिदेशालयेन (ED) तथा च आपराधिक-पक्षस्य अन्वेषणं CID संस्थायाः माध्यमैन कारयितुं सर्वकारः सम्मतः। अपि च, ९० दिनाभ्यन्तरे आरोपपत्रं प्रस्तुतं भवेत् इति कृत्वा 'फास्ट-ट्रैक-न्यायालयस्य' (Fast-track court) स्थापना अपि भविष्यति।

# मत्स्यव्यापारस्य प्रोत्साहनाय ७०% आर्थिकसाहाय्यम्, शीतभण्डारात् 'रेफ्रिजरेटेड- वैन' यानं यावत् लप्स्यते साहाय्यम्




**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचलप्रदेशसर्वकारेण मत्स्यक्षेत्रम् आधुनिकं विधातुं, मत्स्यपालकानां धीवराणां च आयं वर्धयितुं नूतनः प्रयासः आरब्धः। अस्य अन्तर्गतं मत्स्यानाम् मत्स्य-उत्पादानां च भण्डारणाय, प्रसंस्करणाय, परिवहनाय च ७० प्रतिशतं यावत् आर्थिकसाहाय्यं दास्यते। योजनायाः अन्तः पञ्च- मीट्रिक- टन- क्षमतायुतायै शीतभण्डाराय, 'फ्रीज- ड्राई- यूनिट' इत्यस्मै 'रेफ्रिजरेटेड-वैन' यानाय संस्थापनाय पात्रलाभार्थ्यः आर्थिक-साहाय्यं लप्स्यते।
सर्वकारस्य उद्देश्यं 'पोस्ट-हार्वेस्ट'-क्षतिं दूरीकर्तुं सहैव मत्स्यउत्पादानां गुणवत्तां संरक्षितुं उत्पादकेभ्यः च तेषाम् उपजस्य श्रेष्ठं मूल्यं दापयितुम् अस्ति। योजनायाः मत्स्य-क्षेत्रे उद्यमितायाः जीविका-अवसराणां च वर्धनस्य अपि आशा अस्ति।

## कस्यै सुविधायै कति साहाय्यम्-

योजनायाः अन्तर्गतं पञ्च- मीट्रिक- टन- क्षमता-युताय शीतगृहाय १५ लक्षरूप्यकाणि, 'फ्रीज- ड्राई- यूनिट' इत्यस्मै १० लक्ष-रूप्यकाणि तथा च 'रेफ्रिजरेटेड-वैन' यानाय २० लक्ष-रूप्यकाणां धनराशिः निर्धारिता अस्ति। पात्र-लाभार्थीभ्यः एतासु निर्धारितव्ययेषु ७० प्रतिशतं साहाय्यं दास्यते।

## एतेभ्यः जनेभ्यः लप्स्यते योजनायाः लाभः-

योजनायाः लाभः 'फिश- फार्मर्स- प्रोड्यूसर-ऑर्गनाइजेशन', मत्स्य-सहकारी-समितिभ्यः, उद्यमिभ्यः, निरुद्योगी-युवकेभ्यः, स्वयं- सहायता-समूहेभ्यः, धीवरेभ्यः, मत्स्यविक्रेतृभ्यः मत्स्यपालकेभ्यः च दास्यते। नूतन-लाभार्थीभ्यः, विशेषतः निरुद्योगी-युवकेभ्यः, धीवर- सहकारी- समितिभ्यः 'एफ.पी.ओ.' संस्थाभ्यः च प्राथमिकतायाः विधानम् अस्ति।

## शीत-गृहाय भूमिः आवश्यकी

शीतगृहस्य संस्थापनाय आवेदकलभ्यानि उपयुक्ता भूमिः स्थानं वा भवितुम् आवश्यकं भविष्यति। एषा भूमिः आवेदकस्य स्वामित्वे भवेत् अथवा न्यूनतमं १० वर्षाणां दीर्घकालिक-अनुबन्धे गृहीता भवेत्। तत्रैव, 'फ्रीज-ड्राई-यूनिट' संस्थापने वर्त्तमानेभ्यः मत्स्यविक्रेतृभ्यः प्राथमिकता दास्यते। 'रेफ्रिजरेटेडवैन' यानाय आवेदनं कुर्वता लाभार्थीनां पार्श्वे योग्यः व्यावसायिकचालकः भवितुं योग्य- चालकस्य व्यवस्था वा करणम् आवश्यकं भविष्यति।

## त्रिषु चरणेषु भविष्यति निरीक्षणम्-

शीत-गृहाय 'फ्रीज-ड्राई-यूनिट'-इत्यस्मै विभागस्य पक्षतः स्थानं सज्जीकर्तुम्, यन्त्राणि संस्थापयितुम् तथा च 'ट्रायल-रन' काले निरीक्षणं करिष्यते। 'रेफ्रिजरेटेड-वैन' प्रकरणे साहाय्यस्य अन्तिमा अंशराशिः प्रसारणात् पूर्वं तस्य हिमाचलप्रदेश-परिवहनविभागे पञ्जीकरणम् अनिवार्यं भविष्यति। सम्पत्तेः सफलायाः रचनायाः संस्थापनस्य सत्यापनस्य च अनन्तरं साहाय्य-राशिः लाभार्थीनां वित्तकोष-संख्यासु प्रत्यक्ष- लाभ- हस्तान्तरणमाध्यमेन प्रेषयिष्यते।

## सप्त-वर्षाणि यावत् चालनीया भविष्यति एषा सुविधा

सर्वकारीय-साहाय्यस्य दुरुपयोगस्य रोधनाय लाभार्थीभिः साहाय्येन संस्थापिताः सुविधाः न्यूनतमं सप्तवर्षाणि यावत् कार्यशीलाः स्थापनीयाः भविष्यन्ति। मत्स्यविभागस्य पूर्व- अनुमतिं विना एताः सम्पदः विक्रेतुम्, पट्टे (Lease) दातुम्, हस्तान्तरितुम् अथवा एतेषु परिवर्तनं कर्तुम् न शक्ष्यते। विभागः सुविधानाम् कार्यशीलतायाः निरीक्षणाय त्रैमासिकीं सूचनां ग्रहीष्यति। एतदतिरिच्य आवश्यकतानुसारम् आकस्मिक-निरीक्षणानि अपि करिष्यन्ते।

## तैलसङ्ग्रहकुण्डाय कृते कल्पना-विधिः कृशात् ससत्त्वं कुर्यात्

**रविः खरिडेहालः बेङ्गलूरु।** सद्यः प्रकाशितस्य मासिक-आर्थिक-समीक्षा-प्रतिवेदनस्य (Monthly Economic Review) अनुसारं वैश्विक-अस्थिरतायाः तथा च अनिश्चित-भूराजनीतिक-परिस्थितीनां प्रतिकारार्थं भारतेन स्वस्याः ऊर्जा-रणनीतेः पुनराविष्कारः, पुनः कल्पना च कर्तव्या अस्ति। अस्मिन् प्रतिवेदने भारतस्य अपक्वतैलस्य (Crude Oil) वर्धमानः पराश्रयः एका प्रमुखा स्थूल-आर्थिक-चिन्ता (Macroeconomic concern) रूपेण चिह्निता अस्ति। महती आर्थिकचिन्ताप्रतिवेदनस्य अनुसारं भारतं स्वस्याः अपक्वतैल-आवश्यकतायाः प्रायः ९०% (९० प्रतिशतं) भागम् अन्यदेशेभ्यः आयातं करोति। एतादृशः अत्यधिकः पराश्रयः देशस्य अर्थव्यवस्थां प्रति प्रतिकूलं प्रभावं पातयति:मुद्रास्फीतिः (Inflation): अन्तराष्ट्रियविपणे तैलमूल्यानां वृद्ध्या देशे दैनन्दिनवस्तूनां मूल्यवृद्धिः भवति।सकल-राष्ट्रीय-उत्पादः (GDP): आयातव्ययस्य वर्धनेन देशस्य आर्थिकविकासदरः मन्दः भवति।राजकोषीयघातः (Fiscal Deficit): वैदेशिकमुद्रायाः निर्गमनेन देशस्य व्यापारघातः तथा राजकोषीयघाटा च वर्धते। केवलं भण्डारणं न, अपितु 'विविध-ऊर्जा-व्यवस्थायाः' निर्माणम्समीक्षायां स्पष्टीकृतं यत् केवलं तैलस्य सङ्ग्रहः (Storage) पर्याप्तः नास्ति। भारतस्य लक्ष्याणि एतादृशानि भवेयुः: भूराजनीतिक-सङ्कटकाले अपि देशे तैलस्याभावः न भवेत् तादृशी आततिशक्तिः निर्मेतव्या।



## विनोदकणिका 😳

पत्नी अशिक्षिता वा शिक्षिता वा, ईश्वरः तेषां मस्तिष्कम् एकस्मिन् एव यन्त्रागारे निर्मितम्।
{१} यदि तण्डुलेषु जलम् अधिकं पतितं तर्हि तण्डुलानि नवीनानि आसन्।
{२} यदि रोटिका कठोरा भवति तर्हि पिष्टं सम्यक् न पेषणं भवितुमर्हति।
{३} यदि चायः मधुरः आसीत् तर्हि शर्करा स्थूलः आसीत् तथा यदि पानीयं चायम् आसीत् तर्हि क्षीरे जलम् अतिशयेन आसीत्।
{४} विवाहे वा अन्यस्मिन् समारोहे गन्तुं समये का शाटिका धारयेत? मम समीपे उत्तमा शाटिका नास्ति।
{५} यदि पतिमहोदयः समयात् पूर्वं गृहम् आगतः तर्हि अद्य कथं शीघ्रं गृहम् आगतः? यदि सः विलम्बेन आगतः तर्हि भवन्तः एतावत्काले कुत्र आसन्?
{६} यदि पाककौशलस्य प्रशंसां करोति तर्हि अहं प्रतिदिनं स्वादिष्टानि भोजनानि पचामि। यदि भोजने दोषं लभसे तर्हि मम श्रमस्य किमपि मूल्यं नास्ति।
अन्ततः मम कारणात् एव भवतः गृहं स्थिरम् अस्ति, यदि अन्या स्यात् तर्हि सा पलायिता स्यात्।
भवतः भार्या कथं वर्तते? आत्मनः पालनं कृत्वा शान्तं भवितुं प्रयतस्व। मा आतङ्कितः भवतु। तव भार्या पृष्ठतः अस्ति।




**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अतीव विचित्राः वार्ताः मया श्रुताः। चीनदेशे द्वे महिले वने च्युते। रक्षकैः तत्र गतैः उच्चैः आहूतम्। परन्तु ताभ्याम् उत्तरं न दत्तम्। यतः ताभ्यां चिन्तितम् यत् तत्र वन- पिशाचाः विद्यन्ते।
**नन्दिनी-** अहो! पिशाचानां भयं तु हास्यकरम् एव। पिशाचानां विषये एव अन्या वार्ता स्वाल-नाम्नि ग्रामे भारते श्रुता। तस्मिन् ग्रामे ग्रामवासिभिः बाह्य-जनानां प्रवेशः निषिद्धः। यतः कैश्चित् अन्तर्जाल-चलचित्र-निर्मातृभिः असत्यं कथितम् यत् सः ग्रामः पिशाच-ग्रस्तः।
**काव्या-** सत्यम्! असत्य-प्रसारणं न उचितम्। कजाक-देशे अपि एका असत्या वार्ता केनचित् भविष्यद्वक्त्रा उद्घोषिता। तेन उक्तं यत् एका च्युता बालिका मारिता। परन्तु सा बालिका जीवन्ती एव गृहम् आगतवती अस्ति।
**नन्दिनी-** अहो मूर्खः भविष्यद्वक्ता! दिष्ट्या सा बालिका सुरक्षिता। तथा अन्तर्जाले एकेन प्रसिद्धेन नटेन अपि एका विचित्रा वार्ता प्रसारिता। तेन नटेन चलचित्रं दर्शितम् यत् तस्य यानगृहे कश्चित् अन्य-ग्रहवासी निगूढः। किन्तु सः अन्यग्रहवासी न, अपि तु घृषि-वेषधारी कश्चित् मानवः एव दृष्टः। तेन असत्य-चलचित्रेण तस्य नटस्य अनुयायिनः वर्धिताः।

# स्वर्गीयरामप्रतापदुबे-स्मृतौ अन्तर्विद्यालयीय-संस्कृत-समूहगान-समूहनृत्यप्रतियोगितयोः आयोजनम्







**हिमसंस्कृतवार्ता सौरभः दे।** बोकारो। संस्कृतभारती-बोकारोस्य तत्त्वावधानेन स्वर्गीय-रामप्रतापदुबे-स्मृत्यर्थम् अन्तर्विद्यालयीय-संस्कृत-समूहगान-प्रतियोगिता तथा संस्कृत-समूह-भावनृत्य-प्रतियोगिता बोकारो-नगरस्य प्रतिष्ठिते चिन्मय-विद्यालये, सेक्टर-५ इत्यत्र हर्षोल्लासेन समायोजिता। कार्यक्रमस्य शुभारम्भः मातुः सरस्वत्याः तथा मिशन-संस्थापकस्य स्वामि-चिन्मयानन्दस्य चित्रयोः माल्यार्पणेन, दीपप्रज्वालनेन, उदितपाण्डेय-राजेन्द्रोपाध्यायाभ्यां च सस्वर-वैदिकमन्त्रपाठेन च अभवत्। कार्यक्रमस्य अध्यक्षतां चिन्मय-विद्यालयस्य वरिष्ठ-उपप्राचार्यः श्री नरमेन्द्रकुमारः अकरोत्। अस्मिन् गरिमामये कार्यक्रमे संस्कृतभारत्याः मन्त्री डॉ. उदयचन्द्रझाः, अध्यक्षः डॉ. रामनारायणसिंहः तथा प्रतियोगिताद्वयस्य प्रायोजकः प्रख्यातः समाजसेवी संस्कृत-संस्कृतिजीवी च श्री सन्तोषकुमारदुबेः विशिष्टातिथिरूपेण उपस्थिताः आसन्। ज्ञातव्यं यत् अस्य वर्षस्य समस्ताः प्रतियोगिताः स्वर्गीय-रामप्रतापदुबे-महोदयस्य पावन-स्मृतौ समायोज्यन्ते।

उद्घाटनसमारोहे प्रख्यातः समाजसेवी संस्कृत-संस्कृतिजीवी च श्री सन्तोषकुमारदुबेः संस्कृतभाषायाः महत्त्वं प्रतिपादयन् अवदत्— "संस्कृतं सामाजिकस्य, राष्ट्रियस्य, मानवीयस्य च परिचयः अस्ति। एषा भारतस्य वरदानम्, अमृतभाषा च अस्ति। संस्कृतं भारतस्य तथा हिन्दुत्वस्य प्राणः मूलाधारश्च अस्ति।" संस्कृतस्य प्रचार-प्रसाराय, संरक्षणाय संवर्धनाय च स्वकीयम् अटलसङ्कल्पं प्रकटयन् सः समाजजनान् आहूतवान् यत् स्वबालकानां संस्कृताध्ययनम्, अध्यापनम्, चिन्तनं मननं च अवश्यं कारयन्तु, येन ते संस्कारसम्पन्नाः, प्रखराः राष्ट्रभक्ताश्च भवन्तु। योग्यनागरिकत्वप्राप्तये संस्कृतस्य स्वीकरणं समाजेन अवश्यमेव करणीयमिति सः प्रतिपादितवान्।

संस्कृतभारत्याः मन्त्री डॉ. उदयचन्द्रझाः संस्कृत-प्रतियोगितानाम् आयोजनाय संस्कृतभारती-परिवारस्य तथा सहभागी-छात्राणां प्रति कृतज्ञतां प्रकटितवान्। संस्कृतं सः "संजीवनी" इति निरूप्य मानसिकरूपेण पीडितस्य समाजस्य कृते संस्कृतं, सङ्गीतं, नृत्यं च औषधरूपेण वर्णितवान्। धनबाद-क्षेत्रस्य संस्कृतभारती-संयोजकः डॉ. विनयकुमारपाण्डेयः संस्कृतभाषायाः वैज्ञानिकतां नैतिकतां च प्रकाशयन् अवदत् यत् संस्कृतं सदाचारस्य संस्कारस्य च भाषा अस्ति। संस्कृताध्ययनेन एव समाजः भ्रष्टाचारमुक्तः भवितुं शक्नोति। संस्कृतस्य अभावादेव भ्रष्टाचारः, कदाचारः, दुराचारश्च इत्यादयः दुष्कर्माणि समाजे वर्धन्ते इति सः प्रतिपादितवान्।उद्घाटन-समारोहे चिन्मय-विद्यालयस्य उपप्राचार्यः डॉ. रोशनशर्मा, संस्कृतभारती-रामगढस्य डॉ. भूपेन्द्रगौतमः, प्रख्यातः समाजसेवी श्री शशिकान्ततिवारी तथा चिन्मय-विद्यालयस्य कोषाध्यक्षः श्री आर. एम. मलिकः अपि गरिमामयीं उपस्थितिं प्रदत्तवन्तः। संस्कृतभारत्याः अध्यक्षः डॉ. रामनारायणसिंहः समागतानाम् अभ्यागत-अतिथीनां, कार्यकर्तॄणां, निर्णायकानां, अभिभावकानां तथा प्रतिभागी-छात्राणां प्रति हृदयतः धन्यवादं ज्ञापितवान्। प्रतियोगिताद्वयस्य निर्णायकमण्डले तबलावादकः श्री राकेशः, सङ्गीतज्ञः श्री जगदीशबावलः, सङ्गीतशिक्षकः श्री अमितः, सङ्गीत-नृत्य-निदेशिका श्रीमती रञ्जूः, लायन्स-क्लबस्य निदेशकः श्री सोनलदत्तः तथा संस्कृतभारत्याः शैक्षिकप्रमुखः डॉ. नरेन्द्ररायः प्रमुखरूपेण आसन्। निर्णायकैः प्रतिभागिनां प्रस्तुतीनां सूक्ष्मतया परीक्षणं कृत्वा प्रतियोगितायाः मूल्याङ्कनं कृतम्। कार्यक्रमस्य सञ्चालनं डॉ. श्रीहरि-पाण्डेयः, डॉ. विनयपाण्डेयः तथा डॉ. शशि-कान्तपाण्डेयः संयुक्तरूपेण कृतवन्तः। संस्कृतभारती-बोकारोस्य उपाध्यक्षः डॉ. आत्मा-नन्दसिंहः "ऋषिः" स्वर्गीय-रामप्रतापदुबे-महोदयस्य जीवनवृत्तं प्रस्तुत्य संस्कृतसेवायां तस्य समर्पणभावं सेवासङ्कल्पं च प्रकाशयामास। प्रतियोगिताद्वये २५५ तः अधिकाः छात्राः छात्राश्च उत्साहपूर्वकं सहभागितां कृतवन्तः। अस्मिन् अवसरे शतशः संस्कृतानुरागिणः गण्यमान्याः नागरिकाश्च उपस्थिताः आसन्। कार्यक्रमस्य सफलायोजने संस्कृतभारती-बोकारोस्य अनेकैः शिक्षकैः कार्यकर्तृभिश्च महत्त्वपूर्णं योगदानं प्रदत्तम्। तेषु जयप्रकाशसिंहः, डॉ. विनय-कुमारपाण्डेयः, डॉ. विनयपाण्डेयः, डॉ. शशिकान्तपाण्डेयः, श्री जयप्रकाशः, श्री मुकेश-कुमारसिंहः, डॉ. अश्विनीकुमारद्विवेदी, श्री गौरव-कुमारः, श्रीमती विनीता प्रियदर्शिनी, डॉ. प्रमोद-शुक्लः, डॉ. राजेन्द्रोपाध्यायः, श्रीमती सुलोचनासाहू, श्री उदितपाण्डेयः, सुश्री सोनिका, श्री सुबलझाः, श्री नवल-किशोरसिंहः,श्री सौरभः दे इत्यादयः प्रमुखतया उपस्थिताः आसन्। सर्वेषां सक्रियसहयोगेन कार्यक्रमः सुसम्पन्नतया सम्पन्नः।

चलचित्रवार्ताः

# 'टॉक्सिक' चलच्चित्रस्य विज्ञापन पुटकं जातम्




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई**

'टॉक्सिक' इति चलच्चित्रस्य विज्ञापनपुटकं प्रसारितम् अभवत्। अस्मिन् विज्ञापनखण्डे अत्यधिकं क्रियादृश्यं (एक्शन सीन) वर्तते। एतानि क्रियादृश्यानि अतीव हिंसात्मकानि सन्ति। अस्य प्रारम्भः पितृपुत्राभ्यां भवति। पुत्रः स्वपितरं वदति- "क्रोधं मा करोतु, अहं भवतः सर्वं वचनं पालयिष्यामि।" एतौ पिता पुत्रश्च उभौ अपि यशस्य एव पात्रे स्तः। यशः पितुः पुत्रस्य च उभयोः भूमिकां निर्वहति। पितुः पात्रस्य नाम 'राया' अस्ति, यः एकः असाधुः (गैंगस्टर) अस्ति। पुत्रस्य पात्रस्य नाम 'रुमी' इति अस्ति। पितृ-पुत्रयोः प्रवेशानन्तरं विज्ञापनखण्डे कियारा आडवाणी दृश्यते, या सर्कस-मध्ये कार्यं करोति, रुम्याः माता च अस्ति। ततः परम् एकमेकं कृत्वा सर्वेषां मुख्यकलाकाराणां प्रवेशः भवति। कलाकाराणां प्रवेशेन सह उग्रं क्रियादृश्यम् अपि द्रष्टुं लभ्यते, यस्मिन् शोणितपातः भूरिशः हिंसादृश्यानि च सन्ति। एषः विज्ञापनखण्डः रणबीरकपूरस्य 'एनिमल' चलच्चित्रमिव प्रतीयते, यतो हि अस्मिन् अत्यधिकाहिंसा दर्शिता अस्ति।'टॉक्सिक' चलच्चित्रस्य अस्य विज्ञापनखण्डस्य वैशिष्ट्यम् इदम् अस्ति यत् यशः अस्मिन् सुदीर्घकालानन्तरं श्मश्रुरहिते रूपे दृश्यते। 'केजीएफ' चलच्चित्रानन्तरं यशः प्रायः श्मश्रुसहिते रूपे एव दृष्टः। 'रामायणम्' इत्यस्मिन् अपि सः श्मश्रुसहिते रूपे एव दृश्यिष्यते। किन्तु इदानीं तेन 'टॉक्सिक' इति चलच्चित्राय श्मश्रुः निष्कासितः। तथापि 'टॉक्सिक' मध्ये तस्य एकं पात्रं श्मश्रुसहितं भविष्यति, अपरं च पात्रं श्मश्रुरहितं द्रक्ष्यते। 'टॉक्सिक' चलच्चित्रस्य एषः विज्ञापनखण्डः प्रभावशाली अस्ति। यद्यपि अस्मिन् कानिचित् पात्राणि दृष्ट्वा किञ्चित् संशयः अपि भवति, तथापि जनैः एषः विज्ञापनखण्डः रोच्यते। एतं दृष्ट्वा एतादृशं प्रतीयते यत् एतत् चलच्चित्रं चलच्चित्रगृहेषु (बॉक्स ऑफिस) नूतनान् कीर्तिमानान् स्थापयिष्यति।

## हास्यकणिका

-विदुषी

एकः सामान्यः जनः पत्रकारं पृच्छति-
"प्रधानमन्त्री-महोदयः प्रतिदिनं वदति- 'वयं भारतं स्वर्गं करिष्यामः।'
अतः मम प्रश्नः अस्ति- यदा भारतं स्वर्गः भविष्यति, तदा वयं किं कथयिष्यामः- 'भारतवासिनः' अथवा 'स्वर्गवासिनः'?" 🤔
पत्रकारः 🙄 😬 😮 🤯 😳 😖